# Purushottamaproktam Papapadvyapohana Stotram

# પુરુષોત્તમપ્રોક્તં પાપાપદ્વ્યપોહનસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Papapadvyapohana Stotram

File name : puruShottamaproktaMpApApadvyapohanastotram.itx

Category : misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 167/1-105||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં પાપાપદ્વ્યપોહનસ્તોત્રમ્

શ્રીનારાયણીશ્રીરુવાચ ।
આપદ્ગતસ્ય ભક્તસ્ય ભક્તાયાસ્તવ કેશવ ।
આપન્નાશઃ કથં સ્યાચ્ચ પાપનાશઃ કથં ભવેત્ ॥ ૧॥

શ્રીપુરુષોત્તમ ઉવાચ ।
અવ્રતસ્યાઽપ્યશક્તસ્ય જ્ઞાનહીનસ્ય દેહિનઃ ।
આપત્પાપાદિનાશાર્થં સ્તોત્રં વ્યાપહનં મતમ્ ॥ ૨॥

એકાગ્રમાનસો ભૂત્વા સ્તુવીત પરમેશ્વરમ્ ।
અવતારાઁસ્તથા મુક્તાનીશ્વરાન્ પિતૃદેવતાઃ ॥ ૩॥

ઋષીન્ ગુરૂન્ ભાગવતાન્ સાધૂન્ ભક્તાન્ સ્તુવીત ચ ।
અનન્યશરણો ભૂત્વા પ્રાર્થયેત્ સુખવાન્ ભવેત્ ॥ ૪॥

સર્વસિદ્ધિપ્રદં સ્તોત્રં દિવ્યં વદામિ તે રમે ।
શ્રોતુર્વક્તુર્વાચયિતુઃ સર્વેષ્ટાનાં દ્રુતં પ્રદમ્ ॥ ૫॥

“નમોઽનાદિકૃષ્ણનારાયણાય પરમાત્મને ।
મહાભગવતે મુક્તાઽક્ષરેશાય પરાત્મને ॥ ૬॥

સૃષ્ટિત્રયાધિનાથાય સર્વાન્તર્યામિણે નમઃ ।
પરબ્રહ્મણે પુરુષોત્તમાય ચાવતારિણે ॥ ૭॥

સર્વવિત્ સર્વવાસઃ શ્રીનિવાસઃ સર્વસંસ્થિતઃ ।
પરાઽક્ષરસ્થો મુક્તેશશ્ચાપત્પાપં વ્યપોહતુ ॥ ૮॥

અવતારી પરબ્રહ્મ દિવ્યાત્મા શ્રીનરાયણઃ ।
પરમેશો હિ ભગવાનાપત્પાપં વ્યપોહતુ ॥ ૯॥

અનાદ્યનન્તઃ સર્વેશઃ સર્વવિદ્યાધરો હરિઃ ।
સર્વપ્રદઃ સુખદશ્ચ પાપાપદો વ્યપોહતુ ॥ ૧૦॥

અણોરણીયાન્મહતો મહીયાન્ વિશ્વપૂજિતઃ ।
અનાદિશ્રીકૃષ્ણનારાયણઃ પાપં વ્યપોહતુ ॥ ૧૧॥

બ્રહ્મપ્રિયાપ્રિયઃ કાન્તઃ શાન્તઃ સ્નેહભરઃ પ્રભુઃ ।
હરિપ્રિયામનોહારી પાયાઽઽપદો વ્યપોહતુ ॥ ૧૨॥

મુક્તમણ્ડલસંસેવ્યો મુક્તાનિકાપ્રસેવિતઃ ।
કમનીયઃ પરઃ કાન્તઃ પાપાપદો વ્યપોહતુ ॥ ૧૩॥

અવતારી પરિપૂર્ણઃ પરબ્રહ્મ પરાત્પરઃ ।
પરાવરેશઃ પરમઃ પાપાપદો વ્યપોહતુ ॥ ૧૪॥

શ્રીપતિઃ શ્રીધરઃ શ્રીહૃત્ શ્રીમાન્ શ્રીદઃ શ્રિયાઽન્વિતઃ ।
શ્રીપાદઃ શ્રીહરિઃ કૃષ્ણઃ પાપાપદો વ્યપોહતુ ॥ ૧૫॥

લક્ષ્મીપતિર્લક્ષ્મીધરો લક્ષ્મીહૃત્ લક્ષ્મદાઽન્વિતઃ ।
લક્ષ્મીસેવાઽતિસન્તુષ્ટઃ પાપાપદો વ્યપોહતુ ॥ ૧૬॥

રાધાપતિશ્ચ રાધાધૃગ્ રાધાહૃદ્રાધિકાઽન્વિતઃ ।
રાધાત્મા રાધિકાકૃષ્ણઃ પાપાપદો વ્યપોહતુ ॥ ૧૭॥

માણિકીવાહનો માણિકીશ્વરો માણિકીપ્રભુઃ ।
માણિક્યાઽભિનવહારઃ પાપાપદો વ્યપોહતુ ॥ ૧૮॥

ગોલોકેશો ગોપિકેશો ગોપીગોપપ્રપૂજિતઃ ।
ગોપાલકૃષ્ણો ગોધૃઙ્ મે પાપાપદો વ્યપોહતુ ॥ ૧૯॥

નૃવરો નૃપતિર્નાથો નારાયણો નરોત્તમઃ ।
વૈકુણ્ઠવાસી ભગવાન્ પાપાપદો વ્યપોહતુ ॥ ૨૦॥

વસુદો વાસુદેવશ્ચ ધર્માર્થકામમોક્ષદઃ ।
અમૃતાદોઽમૃતદો યે પાપાપદો વ્યપોહતુ ॥ ૨૧॥

ભૂમિદો ભૂસ્થિતો ભૂમા ભૂમતાં ભાગ્યવર્ધનઃ ।
ભૂસત્તાઽવ્યાકૃતસ્વામી પાપાપદો વ્યપોહતુ ॥ ૨૨॥

વેદાઽવનો ધરાધૃક્ચ મન્દ્રધૃક્ જ્ઞાનધૃગ્ઘરિઃ ।
ગોધૃગ્ગોદોહનો હંસઃ પાપાપદો વ્યપોહતુ ॥ ૨૩॥

તાપસો વત્સલઃ સાધુર્ભિક્ષુઃ ક્રૂરોઽધ્વરો વની ।
બાલો ભિષગ્વરઃ ક્લેશી પાપાપદો વ્યપોહતુ ॥ ૨૪॥

સંરાટ્ શાસ્ત્રી કૃષ્ણકાન્તઃ પ્રાજ્ઞોઽવતારકારણમ્ ।
આવેશોંઽશઃ કલા ભૂતિઃ પાપાપદો વ્યપોહતુ ॥ ૨૫॥

પૂર્ણઃ પરો વ્યૂહ ઐશોઽન્તર્યામ્યર્ચાસ્વરૂપકૃત્ ।
વિભવશ્ચૈત્યઃ સુન્યાસી પાપાપદો વ્યપોહતુ ॥ ૨૬॥

સર્વધામનિવાસો યોઽનેકરૂપઃ પરેશ્વરઃ ।
જડચેતનશાસ્તા મે પાપાપદો વ્યપોહતુ ॥ ૨૭॥

નારાયણી શ્રીપુરેશી માધવી પુરુષોત્તમી ।
કાર્ણી શ્રીલલિતાલક્ષ્મીઃ પાપાપદો વ્યપોહતુ ॥ ૨૮॥

ભાર્ગવી દુઃખહાલક્ષ્મીઃ શિવરાજ્ઞી ચ વૈષ્ણવી ।
પદ્મિનિકા પદ્મજા મે પાપાપદો વ્યપોહતુ ॥ ૨૯॥

કમ્ભરાશ્રીર્મહાલક્ષ્મીર્વાસુદેવી પરેશ્વરી ।
આક્ષરી શ્રીર્ભગવતી પાપાપદો વ્યપોહતુ ॥ ૩૦॥

પૌરુષી પ્રાકૃતી દેવી માયેશી પાર્વતી પ્રભા ।
પારબ્રાહ્મી રમા માતા પાપાપદો વ્યપોહતુ ॥ ૩૧॥

ભૂમ્ની પદ્મા ચ વૈરાજી ગઙ્ગા રેવા સરસ્વતી ।
ગાયત્રી ગોમતી ગોપી પાપાપદો વ્યપોહતુ ॥ ૩૫॥

સાદાશૈવી ચ માહેશી બ્રાહ્મી બ્રહ્મપ્રિયા સતી ।
સાધ્વી ચ સ્વામિની ચાન્દ્રી પાપાપદો વ્યપોહતુ ॥ ૩૩॥

હિરણ્મયી કાનકી ચ હરિણી સ્વર્ણરૂપિણી ।
વૈકુણ્ઠા તૂલસી વૃન્દા પાપાપદો વ્યપોહતુ ॥ ૩૪॥

સિદ્ધા પૈત્રી સિદ્ધિરૂપા ચમત્કૃતિઃ સુધૈનવી ।
સુધાઽમૃતા પાશવતી પાપાપદો વ્યપોહતુ ॥ ૩૫॥

પ્રભા સૌરી પાર્ષદાની ચેશ્વરી દેવતા રતિઃ ।
પ્રીતિર્ભક્તિર્વ્રતરૂપા પાપાપદો વ્યપોહતુ ॥ ૩૬॥

સૌમ્યા પુરાતની દિવ્યા સન્તુષ્ટા તૃપ્તિરઞ્જિકા ।
કમલાઽમ્બા શારદા મે પાપાપદો વ્યપોહતુ ॥ ૩૭॥

ઐન્દ્રી ચાનન્દમાત્રા ચ ચિચ્છક્તિર્જ્ઞાનરૂપિણી ।

યોગિની નૈષ્ઠિકી હૃત્સ્થા પાપાપદો વ્યપોહતુ ॥ ૩૮॥

મોહિની નન્દિની પદ્મેક્ષણોર્વશી પતિવ્રતા ।
જનની સ્વર્ણવર્ણા મે પાપાપદો વ્યપોહતુ ॥ ૩૯॥

પુણ્યા ચ પાવની વિદ્યા ધનદા વિત્તધારિણી ।
આર્ત્તિહાઽબ્ધિસુતા શાન્તા પાપાપદો વ્યપોહતુ ॥ ૪૦॥

ભાવજ્ઞા ભુક્તિમુક્ત્યાદિપ્રદા ભક્તાઽભયઙ્કરી ।
સર્વાર્ધાઙ્ગા જીવની શ્રીઃ પાપાપદો વ્યપોહતુ ॥ ૪૧॥

સૌભાગ્યયુક્તા શોભાઢ્યા સર્વાભરણભૂષિતા ।
સર્વશૃઙ્ગારદીપ્તાઙ્ગા પાપાપદો વ્યપોહતુ ॥ ૪૨॥

સસ્યલક્ષ્મીઃ રત્નલક્ષ્મીઃ સમ્પલ્લક્ષ્મીઃ કુટુમ્બિની ।
ધાન્યાઽન્નધારિણી ગૌરી પાપાપદો વ્યપોહતુ ॥ ૪૩॥

રોહિણી પોષણકર્ત્રી કન્યકા નવયૌવના ।
રામચિત્રી સુરામા મે પાપાપદો વ્યપોહતુ ॥ ૪૪॥

સત્ત્વમયી સત્ત્વદાત્રી સત્ત્વધ્રા સત્ત્વયોગિની ।
સાત્ત્વિકી સચ્ચિદાનન્દા પાપાપદો વ્યપોહતુ ॥ ૪૫॥

મુક્તાશ્ચ પાર્ષદા ભક્તા ભક્તાન્યઃ સાધ્ય ઈશ્વરાઃ ।
ઈશ્વરાણ્યો મહામુક્તા વ્યપોહન્ત્વઘમાપદઃ ॥ ૪૬॥

શઙ્ખશ્ચક્રં ગદા પદ્મં કૌસ્તુભો મુકુટો હરેઃ ।
વનમાલા પુષ્પમાલા વ્યપોહન્ત્વઘમાપદઃ ॥ ૪૭॥

યષ્ટિશ્છત્રં ચામરં ચાઙ્ગદશ્ચ કટકસ્તથા ।
શૃઙ્ખલા રશના કાષ્ણી વ્યપોહન્ત્વઘમાપદઃ ॥ ૪૮॥

ગુણૈશ્વર્યાણિ સર્વાણિ ચમત્કારાશ્ચ સિદ્ધયઃ ।
શક્તયઃ શ્રીહરેઃ સર્વા વ્યપોહન્ત્વઘમાપદઃ ॥ ૪૯॥

શાલગ્રામસ્તથા શાલઙ્કાયનર્ષિશ્ચ ગણ્ડકી ।
ત્રિવેણી શાલવૃક્ષશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૦॥

બદરી બદરીવાસાઃ ઋષયશ્ચ નરો હરિઃ ।
ગઙ્ગા હિમાશ્રયો હૈમા વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૧॥

શેષશાયી ક્ષીરનિધિઃ ક્ષીરજા શ્વેતભોગિરાટ્ ।
નિરન્નમુક્તભક્તાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૨॥

બ્રહ્મા વિષ્ણુઃ શઙ્કરશ્ચ ગણેશશ્ચ પ્રભાકરઃ ।
ગણા રુદ્રાશ્ચ રુદ્રાણ્યો વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૩॥

સિદ્ધા યક્ષાશ્ચ ગન્ધર્વાશ્ચન્દ્રસ્તારાશ્ચ તૈજસાઃ ।
ગ્રહાશ્ચ કેતવશ્ચાપિ વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૪॥

હંસો ગરુડો વૃષભઃ સિંહશ્ચ હરિણો ગજઃ ।
શેષઃ શિખી ટિવ્યવાહા વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૫॥

કાર્તિકેયો મહાકાલો મહાવજ્રં ત્રિશૂલકમ્ ।
કાલદણ્ડો હેતયસ્તે વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૬॥

આદિત્યા વસવો રુદ્રા અશ્વિનાવીશ્વરેશ્વરાઃ ।
દિક્પાલા લોકપાલાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૭॥

ગગનં સ્પર્શનં તેજો રસશ્ચ પૃથિવી તથા ।
તન્માત્રાણિ તથા પ્રાણા વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૮॥

સાધ્યા વિશ્વે મરુતશ્ચ કિન્નરા ગુહ્યકાસ્તથા ।
ગન્ધર્વા કિમ્પુરુષકા વ્યપોહન્ત્વઘમાપદઃ ॥ ૫૯॥

દેવાનાં માતરશ્ચાપિ ગણાનાં માતરસ્તથા ।
ભૂતાનાં માતરઃ સર્વા વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૦॥

અપ્સરસસ્તથા દેવ્યો રાશયસ્તિથયસ્તથા ।
પક્ષા માસા વત્સરાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૧॥

જ્વરા રોગાશ્ચ ઋતવઃ ઋણાનિ રાક્ષસાસ્તથા ।
દૈત્યાશ્ચ દાનવા દુષ્ટા વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૨॥

સાગરાઃ સરિતઃ કૂપાસ્તડાગાનિ ચ દીર્ઘિકાઃ ।
વાપ્યઃ સરાંસિ વરુણો વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૩॥

ગાવો યાઃ કામવર્ષિણ્યઃ કલ્પપૂરાશ્ચ વલ્લિકાઃ ।
તથા ચ કલ્પતરવો વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૪॥

યજ્ઞા યજ્ઞક્રિયાશ્ચાપિ વિધયઃ શ્રુતયોઽપિ ચ ।
ઋચઃ સામાનિ છન્દાંસિ વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૫૯॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સહસ્રબાહુઃ સર્વજ્ઞો વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૬॥

પાવકઃ પાવનો વહ્નિઃ સપ્તાર્ચિઃ સપ્તજિહ્વિકઃ ।
સ્વર્ણપિતા બ્રહ્મમુખં પાપાપદો વ્યપોહતુ ॥ ૬૭॥

દાનં દમો દયા દૈવં દેવા દેવ્યશ્ચ સાધવઃ ।
સન્તઃ સત્પુરુષાઃ પુણ્યા વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૮॥

વૃદ્ધા વન્દ્યા ભાગવતા ભક્તાશ્ચૈકાન્તિનો હરેઃ ।
દૈવજ્ઞા દેવપુરુષા વ્યપોહન્ત્વઘમાપદઃ ॥ ૬૯॥

વ્રતાનિ પુણ્યકર્માણિ સુકૃતાનિ પ્રસેવનમ્ ।
સેવા શ્રદ્ધા ભાવના ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૦॥

યોગા જ્ઞાનાનિ સર્વાણિ સત્યં વૈરાગ્યમીશિતા ।
ઉપાસના હરેરાજ્ઞા વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૧॥

ગૃહદેવા ગ્રામદેવાઃ ક્ષેત્રદેવાશ્ચ સીમગાઃ ।
દ્વારદેવા બહિર્દેવા વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૨॥

વાસ્તુદેવાઃ શ્રાદ્ધદેવા મખદેવા મહોત્સવાઃ ।
તીર્થાનિ દેવવાસાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૩॥

દેવાલયા મન્દિરાણિ મઠાઃ કથાસ્થલાનિ ચ ।
મુક્તિક્ષેત્રાણિ સર્વાણિ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૪॥

માતરઃ પિતરઃ શ્રેષ્ઠા બાન્ધવાશ્ચ સતીશ્રિયઃ ।
ભક્તા બાલા બાલિકાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૫॥

પ્રાયશ્ચિત્તાનિ સર્વાણિ દર્ભાશ્ચ દેવહેતયઃ ।
હવ્યકવ્યાનિ દૈવાનિ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૬॥

દેવરથા દેવયાના દેવમાર્ગાશ્ચ દેવતાઃ ।
આતિવાહિકદેવાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૭॥

વિદ્યુતશ્ચ ઘના મેઘા ભૂકમ્પા ઈતયસ્તથા ।
બલિહારાશ્ચ યે દેવા વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૮॥

નિધયશ્ચ દિશાશ્ચાપિ મનવશ્ચ કલાસ્તથા ।

ચતુર્દશભવનાનિ વ્યપોહન્ત્વઘમાપદઃ ॥ ૭૯॥

વ્યાહૃતયઃ પ્રાણયમા યામ્યાશ્ચ ધર્મવંશજાઃ ।
ધર્મદેવશ્ચ તત્પત્ન્યો વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૦॥

કુણ્ડમણ્ડપદેવાશ્ચ ધ્વજશાખાનિવાસિનઃ ।
સમિત્પાત્રાદિદેવાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૧॥

સદ્ગુરોશ્ચરણૌ લક્ષ્મિ ચરણામૃતવારિ ચ ।
ગુરુભુક્તપ્રસાદશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૨॥

સતીપતિપાદવારિ સાધુચરણવારિ ચ ।
વિષ્ણુપાદોદકં પુણ્યં વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૩॥

સતાં સમાગમઃ સેવાઽઽશ્રયશ્ચાઽઽજ્ઞાવચાંસિ ચ ।
પ્રસન્નતાઽઽશીર્વાદાશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૪॥

માતૃતીર્થં પિતૃતીર્થં ગુરુતીર્થં તથોત્તમમ્ ।
પતિતીર્થં સતીતીર્થં વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૫॥

ગોતીર્થં ચાઽવભૃથતીર્થં પઙ્ક્તિતીર્થં ચ દક્ષિણમ્ ।
સન્યાસતીર્થં મન્ત્રશ્ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૬॥

યજ્ઞોપવીતકં કણ્ઠી તૌલસેયી સમર્પણમ્ ।
આત્મનિવેદિતાખ્યં ચ વ્યપોહન્ત્વઘમાપદઃ ॥ ૮૭॥

યોગિત્વં સાધુતા નૈષ્ઠિકતા શ્રોત્રિયતા તથા ।
બ્રહ્મસત્તા ભક્તતા ચ પાવયન્તુ હિ માં સદા ॥ ૮૮॥

પાવની કુઙ્કુમવાપી પાવનઃ શ્રીનરાયણઃ ।
પાવનીશ્રીઃ પાવયન્તુ માં સદા શરણાગતમ્ ॥ ૮૯॥

ધર્મો વિષ્ણુઃ શ્રીશ્ચ ભક્તિઃ સેવા માં પાવયન્ત્વિહ ।
એષઃ સમર્પિતશ્ચાઽસ્મિ તં માં ભક્તં પુનન્ત્વિહ ॥ ૯૦॥

એવં સ્તુવન્ નમેદ્ભૂમૌ લક્ષ્મિ પાવનવૃત્તિમાન્ ।
આપદસ્તસ્ય નશ્યન્તિ નિવર્તન્તે હ્યઘાનિ ચ ॥ ૯૧॥

વ્યપોહનસ્તવં દિવ્યં યઃ પઠેચ્છૃણુયાદપિ ।
પત્રં પુષ્પાદ્યર્પયેશ્ચ શુદ્ધો ભવતિ તત્ક્ષણાત્ ॥ ૯૨॥

કન્યાર્થી લભતે કન્યાં જયકામો જયં લભેત્ ।
અર્થકામો લભેદર્થં પુત્રકામઃ સુતાન્ લભેત્ ॥ ૯૩॥

વિદ્યાર્થી લભતે વિદ્યાં ભોગાર્થી ભોગમાપ્નુયાત્ ।
સમ્પદર્થી સમ્પદશ્ચ રાજ્યાર્થી રાજ્યમાપ્નુયાત્ ॥ ૯૪॥

સ્વર્ગાર્થી સ્વર્ગમાદદ્યાન્મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
દુઃખનાશાભિલાષી ચ દુઃખનાશમવાપ્નુયાત્ ॥ ૯૫॥

પત્યર્થિની પતિં રમ્યં ધનાર્થિની ધનં લભેત્ ।
સુખાર્થિની સુખં ચાપિ સૌભાગ્યં લભતે તથા ॥ ૯૬॥

યશોઽર્થિની યશશ્ચાપિ પ્રાધાન્યં લભતે તથા ।
યાન્ યાનર્થયતે કામાન્ સર્વાનવાપ્નુયાત્ સ્તવી ॥ ૯૭॥

પઠ્યમાનમિદં પુણ્યં યમુદ્દિશ્ય તુ પઠ્યતે ।
તસ્ય રોગા ન બાધન્તે વાતપિત્તાદિસમ્ભવાઃ ॥ ૯૮॥

નાઽપમૃત્યુર્ભવેત્તસ્ય ન દંષ્ટ્રાવિષસઙ્ગમઃ ।
નાઽકાલદુઃખવાઁશ્ચાપિ ભવેદ્વ્યપોહનસ્તવી ॥ ૯૯॥

સર્વતીર્થપ્રપુણ્યાનિ યજ્ઞપુણ્યાનિ યાનિ ચ ।
દાનવ્રતાનાં પુણ્યાનિ લભેદ્વ્યપોહનસ્તવી ॥ ૧૦૦॥

ગોઘ્નઃ કૃતઘ્નો વીરહા બ્રહ્મહા બાલહા તથા ।
શરણાગતહા મિત્રવિશ્વાસઘાતકોઽપિ ચ ॥ ૧૦૧॥

માતૃહા પિતૃહા નારીહા તથા પશુઘાતકઃ ।
વ્યપોહ્ય સર્વપાપાનિ શુદ્ધો ભવતિ સંસ્તવી ॥ ૧૦૨॥

ભક્તિં કૃત્વા સર્વપુણ્યો યાતિ મોક્ષપ્રદં તતઃ ।
અગતિકસ્ય ગતિદં સ્તોત્રં વ્યપોહનં ત્વિદમ્ ॥ ૧૦૩॥

લક્ષ્મિ સ્તુત્વાઽનેન માં તુ નમેત્ પ્રપ્રાર્થયેત્તતઃ ।
ધ્યાત્વા બ્રહ્મમયો ભૂત્વા મુચ્યતે બન્ધનાદિતઃ ॥ ૧૦૪॥

એતદુચ્ચાર્ય ભાવેન સ્તોતવ્યં નાવશિષ્યતે ।
તસ્માદાપત્પ્રદે કાલે વ્યપોહનં સમુચ્ચરેત્ ॥ ૧૦૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૬૭-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં પાપાપદ્વ્યપોહનસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૬૭/૧-૧૦૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 167/1-105..

Proofread by PSA Easwaran

---

*Purushottamaproktam Papapadvyapohana Stotram*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*